या सुगंधस्यनासादि-नवद्वाराऽखिलेन या |
दुराधर्षा सर्वसस्योदयार्थं या करीषिणी ||१ ||
या नित्यपुष्टा सर्वांगैः सौंदर्यादिगुणैरपि |
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ||२ ||
मातर्लक्ष्मि नमस्तुभ्यं माधवप्रियमानिनि |
युवां विश्वस्य पितरावितरेतरयोगिनौ ||३ ||
समना किल मातस्त्वममुना ततयोगिनी |
मम नाथेन देवश्च विमनाश्च न स त्वयि ||४ ||
त्वं वेदमानिनी वेदवेद्यः किल स ते प्रियः |
त्वं मूलप्रकृतिर्देवी स चादिपुरुषः किल ||५ ||
यस्त्वामुरसि धत्तेऽंब कौस्तुभद्युतिभासिते |
सत्वां नैवाच्युतः सर्वस्यात्यये सत्यपि त्यजेत् ||६ ||
देवि त्वं ललनारत्नं देवोऽसौ पुरुषोत्तमः |
युवां युवानौ सततं युवयोर्न वयोऽधिकः ||७ ||
त्वं पद्मिनीपद्मवक्त्रा पद्माक्षी पद्मविष्टरा |
पद्मद्वयधरा पद्म कोशोद्यत्स्तनशोभना ||८ ||
पद्महस्ता पद्मपादा पद्मनाभमनःप्रिया |
पद्मोद्भवस्य जननी पद्मा च वरवर्णिनी ||९ ||
अंबां पीतांबरश्रोणीं लंबालकलसन्मुखीं |
बिंबाधरोष्ठीं कस्तूरि-जंबालतिलकां भजे ||१० ||
रत्नोद्दीप्तसुमांगल्य-सूत्रावृतशिरोधराम् |
कुंडलप्रभयोद्दंड-गंडमंडलमंडिताम् ||११ ||
कुचकंचुक संचारि-हारनिष्कमनोहराम् |
कांची-किंकिणि-मंजीर-कंकणाद्यैरलंकृताम् ||१२ ||
सुवर्णमंटपे रत्नचित्रसिंहासनोत्तमे |
नमामि हरिणा साकमिंदिरां कृतमंदिराम् ||१३ ||
ब्रह्माद्या विबुधश्रेष्ठाः ब्रह्माण्याद्याः सुरांगनाः |
यां पूजयंते सेवंते सा मां पातु रमा सदा ||१४ ||
सर्वालंकार भरितौ सर्वज्ञौ सर्वसद्गुणौ |
शर्वादिसर्वभक्तौघ सर्वसर्वस्वदायकौ ||१५ ||
सुमुखौ सुंदरतनौ सुनासौ सुखचित्तनू |
सुराराधितपादाब्जौ रमानारायणौ स्तुमः ||१६ ||
चतुष्कपर्दा या देवी चतुरास्यादिभिः स्तुता |
चतुर्वेदोदितगुणा चतुर्मूर्तेर्हरेः प्रिया ||१७ ||
घृतप्रतीकां तां नित्यं घृतपूर्णान्नदायिनीम् |
यथेष्टवित्तदात्रीं च नतोऽस्म्यभयदां श्रियम् ||१८ ||
वादिराजेन रचितं श्रीश्रीशगुणदर्पणम् |
इमं स्तवं पठन् मर्त्यः श्रीमान् स्यान्नात्र संशयः ||१९ ||

||इति श्रीवादिराययतिकृतं श्रीश्रीशगुणदर्पण स्तोत्रं संपूर्णम् ||